किञ्च सौत्रेण भौमशब्देन तैजसत्वाद्युपलक्षणे यथाशाब्दमितरयोरिति व्यर्थं। मांसादित्यादिशब्दोक्तलोहितमज्जारूप दृष्टान्तगताप्यतेजसत्वयोरपि भौमशब्देनैव लाभात्। अनुपलक्षणे च मांसादित्यादिशब्दोक्तवाग्रूप दार्ष्टान्तिकस्य तैजसत्वं न सिध्येदिति यत्किञ्चिदेतत्। केचित्तु अनेन जीवेनेति श्रुतेः जीवविशेषहिरण्यगर्भकर्तृकं नामरूपव्याकरणमिति पूर्वपक्षयन्ति। तन्न। जीवशब्दमात्रेण हिरण्यगर्भकर्तृकत्वं पूर्वमेवदूषितं।

Colophon :

इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादशिष्येण व्यासयतिना विरचितायां श्रीमद्भाष्यटीकाविवृतौ तात्पर्यचन्द्रिकायां द्वितीयाध्यायस्य चतुर्थः पादः । समाप्तश्चद्वितीयाध्यायः ।

R. No. 5807

Paper. 10½ × 4 inches. Foll. 404. Lines, 12 on a page. Devanāgarī. Not good. Extent, 13,000 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācāriār, Hanumantalala Street, Triplicane, Madras.

अभिनवताण्डवम् by सत्यनाथयतिः ।

ABHINAVATĀṆḌAVAM by Satyanāthayati.

A work dealing with the epistemology of the Dvaita school of Vedānta by Satyanāthayati, disciple of Satyanidhitīrtha.

Complete.

Beginning :

यदीयचरणस्पर्शाच्छिलाभूद्रतिसत्तमा ।
अहल्या ज्ञानसिद्ध्यर्थं रामचन्द्रं तमाश्रये ॥
ज्ञाने यः स्थापयामास देवमानवपक्षिषु ।
ज्ञानविज्ञानसिध्यर्थं वेदव्यासमहं भजे ॥
अनुव्याख्यामृताम्भोधिर्यदास्या न्निस्सृतोमरान् ।
नरान् करोति तं वन्दे पूर्णबोधं जगद्गुरूम् ॥

Colophon :

इति श्रीमत्सत्यनिधितीर्थश्रीचरणचरणाराधकश्रीमत्सत्यनाथयति विरचिते अभिनवताण्डवे प्रत्यक्षखण्डः समाप्तः ।

End :

तदपि न । चेष्टातो निष्कम्पप्रवृत्तिदर्शनेन संज्ञाप्रतिभयोरन्यतरस्मादित्यनवधारणायोगात् । चेष्टातः अनुमिनोमीति व्यवहारदर्शनाच्च । यदपि चत्वारि प्रमाणानीति । तदप्ययुक्तं । अर्थापत्त्यादीनामिवोपमानस्यपि पृथक् प्रामाण्याभावात् । उपमानस्यानुमानान्तर्भावस्तु प्रागेव दर्शितः इत्यशेषमतिमङ्गलम् ।

Colophon:

इति श्रीमत्सत्यनिधितीर्थश्रीचरणाराधकश्रीमत्सत्यनाथयतिविरचिते अभिनवताण्डवे शब्दखण्डः समाप्तः ।

R. No. 5808

Paper. 9 × 4½ inches. Foll. 88. Lines, 12 on a page. Devanagari. Not good. Extent, 1,936 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Hanumantalala Street, Triplicane, Madras.

तत्वप्रकाशिकाव्याख्या - वाक्यार्थमुक्तावली by श्रीनिवास

TATTVAPRAKĀŚIKĀVYĀKHYĀ—VĀKYĀRTHAMUKTĀVALĪ by Śrīnivāsa.

Similar to the work described under R. No. 4109.

Contains 1st Adyhyāya and two Pādas of the 2nd Adhyāya.

Beginning:

युक्तिभिस्समयैः शुद्धैर्वेदै र्युक्त्युपबृंहितैः ॥
यद्गुणा न विरुध्यन्ते तमुपासे श्रियः पतिम् ॥

पूर्वाध्यायेति । ब्रह्मस्वरूपनिरूपणेन च दोषात् किं द्वितीयेनेत्यत इति पूरणीयं । उक्तस्समन्वयः साक्षादविरोधोऽत्र साध्यत इत्यनुभाष्ये समन्वयप्राधान्येन सङ्गतिरुक्ता । अत्रतु समन्वयार्थप्राधान्येनेति भेद इति भावेनेक्तेर्थे इति भाष्यभावमाह । अशेषेति । शास्त्रयोनित्वादिति जगज्जन्मादिकारणत्वमुखानन्तगुणपूर्णत्वे शास्त्रं प्रमाणीकृत्य समन्वयमुखेनेत्यर्थः ।

End:

तुरीयं सर्वविषयमिति सूत्रक्रमः । अत्राद्यषट्कहैतुकानां पाषण्ड निरासके द्वितीयषट्केऽधिकरणचतुष्टये वैदिकपाषण्डिना मधिकरणद्वये वैदिकपाषण्डिनोर्निरासः इति पेटिका ज्ञेया ।

Colophon:

इति श्रीमद्विठलाचार्य तनूजेन श्रीमत्तीर्थाचार्य चरणसेविना श्रीनिवासेन रचितायां श्रीमत्तत्त्वप्रकाशिकावाक्यार्थमुक्तावल्यां द्वितीयाध्यायस्य द्वितीयः पादः ।

Scribe adds:

श्रीमुख संवत्सर भाद्रपद शुक्लसप्तम्यां एतल्लेखनं संपूर्णम् ।

R. No. 5809

Paper. 10¼ × 4 inches. Foll. 316. Lines, 10 on a page. Devanāgarī. Injured. Extent, 6,320 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalala Street, Triplicane, Madras.

भारततात्पर्यनिर्णयः टिप्पणीसहितः ।

BHĀRATATATPARYANIRṆAYAḤ with Ṭippaṇī.

The text is written by Ānandatīrtha and the commentary by Varadarāja.

Same text as that described under D. No. 4824 and commentary described under D. No. 4830.

R. No. 5810

Paper. 10½ × 5½ inches. Foll. 36. Lines, 13 on a page. Devanāgarī. Good. Extent, 936 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalala Street, Triplicane, Madras.

यमकभारतटीका by यदुपतिः

YAMAKABHĀRATAṬĪKĀ by Yadupati.

Same work as that described under D. No. 11890.

Wherein see for the beginning.

Complete.

End :

सुरशिखामणिमध्वविनिर्मितं
यमकभारत मिहैकदेशतः ।
विवरितुं नहि शक्य मथापित-
स्करुणया कृतिरीषदियं मम ॥
व्यासं सर्वगुणावासं वासवीनन्दनं विभुम् ।
श्रीनिवासं सदा वन्दे भासमानं हृदम्बरे ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्यश्रीमद्यमकभारत तात्पर्य-निर्णयस्य टीका श्रीमद्वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना विरचिता समाप्ता ।

Scrbe adds:

श्रीनृसिंहार्यतनूजेन रामचन्द्रेण सेविना ।
लिखिता यमकस्यापि व्यख्या श्रीनिर्मलाशुभा ॥
बिंबमूर्तिः श्रीनिवासः प्रीतो भवतु सर्वदा ।
लेखनेन श्रमो यस्तु सफलं भवति ध्रुवम् ॥

आनन्दनाम संवत्सर आषाढमास . . . . . . चतुर्थ्यामेतल्लेखनं संपूर्णम् ॥

R. No. 5811

Paper. 10¾ × 4 inches. Foll. 195. Lines, 11 on a page. Devanāgarī. Good. Extent, 4,350 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalala Street, Triplicane, Madras.

भगवद्गीताभाष्यटीका— प्रमेयदीपिका—जयतीर्थप्रणीता

BHAGAVADGĪTĀBHĀṢYAṬĪKĀ—PRAMEYADĪPIKĀ by Jayatīrtha.

A commentary on Ānandatīrtha's Bhagavadgītābhāṣya by Jayatīrtha which work has been described under D. No. 2080.

Complete.

Beginning :

गुणगणनिलयं पतिं रमायाः
जगदघदहनं च वासवीसूनुम् ।
मुनिकुलतिलकं च पूर्णबोधं
गुरुमपि परमगुरुं च मे वन्दे ॥
आनन्दतीर्थ भगवत्पादाचार्य विनिर्मितम् ।
व्याख्यास्ये भगवद्गीताभाष्यं तत्करुणाबलात् ॥

प्रारिप्सितविघ्नविघातादिप्रयोजनं समुचितविशिष्टेष्टदेवतागुरुप्रणामं ग्रंथारंभप्रतिज्ञां चादौ निबध्नाति भगवान् भाष्यकारः । देवमिति । अत्र देवशब्दो देवताशब्दपर्यायः । प्रतिपाद्यमाह । सन्निधानाद्भगवद्गीताया इति लभ्यते । तेनेदानीं नारायणस्य प्रणामे समुचिततामाचष्टे । अज्ञान पारतन्त्र्यादिभिः सर्वदोषैः विशेषेण सर्वदा सर्वात्मना वर्जितं परितो देशतः कालतः गुणतश्च पूर्णमिति वैशिष्ट्यमाचष्टे ।

End :

कथमिति । अस्मिन् शास्त्रे क्रियत इति शेषः । अशाब्दोऽयमर्थ इति चेन्न धर्मशब्दस्य स्वकार्यफलोपलक्षणत्वात् । एवमेव भगवता व्याख्यातत्वाच्चेत्याह—यस्त्विति । इदानीं समापितभाष्यो भगवानाचार्यो भाष्यनिर्माणस्य भगवत्प्रीतिमेव फलमाशास्ते । पूर्णेति । एतद्गीता-मित्यनेन निरूपणमित्यनेन च सम्बध्यते । तेनेतिश्रवणाद्यदिति लभ्यते ।

करतलकलितामलकमिव
प्रभुणा येनेद मवगतं विश्वम् ।

स जयति जनकसुतायाः
कान्तः श्रीरघुनन्दनो देवः ॥

नमामि व्यासदासस्य पुण्यबुद्धेः पदाम्बुजे ।
नतामरशिरोरत्नराजिनीराजिते सदा ॥

अक्षोभ्यतीर्थगुरुणा शुकवच्छिक्षितस्य मे ।
वचोभिरमृतप्रायैः प्रीयन्तां सततं बुधाः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्गीताभाष्यस्य-टीकायां जयतीर्थमुनिविरचितायां प्रमेयदीपिकायां अष्टादशोऽध्यायः ॥

R. No. 5812

Paper. 10½ × 4 inches. Foll. 41. Lines, 8 on a page. Devanāgarī. Good. Extent, 760 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramanācar, Hanumantalala Street, Triplicane, Madras.

प्रपञ्चमिथ्यात्वानुमानखण्डनपञ्चिकाव्याख्या—
भावप्रकाशिका—व्यासयतिप्रणीता

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAPAÑCIKĀVYĀKHYĀ BHĀVAPRAKĀŚIKĀ by Vyāsayati.

Same work as that described under R. No. 3928 (*b*).

Wherein see for the beginning.

Complete.

End :

नाप्यभेदादि चिदात्मनेत्युक्त्या अभेदाप्रसक्तौ यो गुणगुणिभावाभावः सोपिनेति गुणग्रहणं कुर्वतोक्तमित्यर्थः । अभेदेपि विशेषबलात् गुणगुणिभावो भविष्यतीति भावः ।

अभीष्टफलदातारं शुकादिद्विजसेवितम् ।
भवाध्वाटनाखिन्नोहं विष्णुमन्दारमाश्रये ॥

Colophon :

इति श्रीमद्ब्रह्मण्यपूज्यपादानां शिष्येण व्यासयतिना विरचिता प्रपञ्चमिथ्यात्वानुमानखण्डनपञ्चिका भावप्रकाशिका समाप्त ।

R. No. 5813

Paper. 10 × 4 inches. Foll. 33. Lines, 8 on a page. Devanāgarī. Good. Extent, 512 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār. Hanumantalala Street, Triplicane, Madras.

गयामाहात्म्यम् ।

GAYĀMĀHĀTMYAM.

Same work as that described under R. No. 2096.

Complete in 8 Adhyāyas.

R. No. 5814

Paper. 8½ × 4 inches. Foll. 81. Lines, 7–8 on a page. Devanāgarī. Good. Extent, 972 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramanācār, Hanumantalāla Street, Triplicane, Madras.

सृष्टिमुक्तावली—श्रीनिवासार्यविरचिता

SṚṢṬIMUKTĀVALĪ by Śrīnivāsārya.

A treatise on creation according to the Dvaita school by Śrīnivāsārya, son of Viṭhalārya and disciple of Tīrthārya.

Complete.

Beginning :

इन्दीवरदलश्यामं भैष्मीसत्या समन्वितम् ।
कृष्णं वन्दे पूर्णबोधमुनिहृत्पद्मसंस्थितम् ॥
श्रीविठलार्यपुत्रेण श्रीमत्तीर्थार्यसेविना ।
क्रियते श्रीनिवासेन सृष्टिमुक्तावलीशुभा ॥

क्व सृष्टिशास्त्राब्धिनिमग्नसृष्टि-
मुक्तावबोधोऽल्पधियो मम स्यात् ।
दूरेतु मुक्ताग्रथनं करिष्ये
तथापिसंस्मृत्य गुरोः पदाब्जम् ।

जन्माद्यस्य यत इति भगवता जन्मादिकर्तृत्वं भगवत उक्तं । सृष्टिरक्षाहातिज्ञान नियत्यज्ञानबन्धनात् । मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्नचान्यथेति" भगवत्पादैस्तद्ज्ञानाभावे मोक्षाभाव उक्तः। अतस्तत्प्रकारो लेशेन प्रपञ्च्यते ।

आसीदुदारगुणवारिधिरप्रमेयो
नारायणः परतरः परमात्म एकः ।
संशान्तसंविदखिलं जठरे निधाय
लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे ॥

तस्योदरस्थजगतः सदमन्दसान्द्र-
स्वानन्द तुष्टवपुरुषोपि रमारमस्य ।
भूत्यै निजाश्रित जनस्य हि सृज्यसृष्टा-
वीक्षा बभूव परनाम निमेषकान्ते ॥

अत्र सृज्य सृष्टावित्यस्य पराधीनाविशेषाप्त्या जनिमत्सर्वमेवचोति यत्पराधीन विशेषावाप्तिमत्वं सृज्यतावच्छेदकमुक्तम् । तदवाछिन्न सर्वसृष्टा-वित्यर्थः ।

End :

एवं विदुर्ये परमामनन्ता
मजस्य शक्तिं पुरुषोत्तमस्य ।
तस्य प्रसादादथ दग्धदोषाः
तमाप्नुवन्त्याशु परं परेशम् ॥
देवानिमान् मुक्तसमस्तदोषान्
स्वसन्निधाने विनिवेश्य देवः ।
पुनस्तदन्या नधिकारयोग्यां-
स्तत्तद्गुणानेव पदे प्रयुङ्क्ते ॥ इत्यशेषमतिमङ्गलम् ।

कवेरजोत्तुङ्गतरङ्गसङ्गते-
रङ्गे शयाने भुजगेन्द्रभोगे ।
श्रीरङ्गनायक्युपगूहिताङ्गे
मुक्तावलीं मे गुरवोऽर्पयन्तु ॥
श्रीविठलार्यपुत्रेण श्रीमत्तीर्थार्यसेविना ।
कृतेयं श्रीनिवासेन सृष्टिमुक्तावली शुभा ।

Colophon :

इति श्रीश्रीनिवासार्यविरचिता सृष्टिमुक्तावली समाप्ता ॥

R. No. 5815

Paper. 8½ × 5½ inches. Foll. 12. Lines, 13 on a page. Devanāgarī. Good. Extent, 240 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalāla Street, Triplicane, Madras.

ब्रह्मसूत्राणुभाष्यटीका

BRAHMASŪTRĀṆUBHĀṢYAṬĪKĀ.

Similar to the work described under R. No. 4106 *ante*.

Complete.

Beginning :

लक्ष्मीनारायणं नत्वा व्यासं मध्वादिकान् गुरून् ।
ब्रह्मसूत्राणुभाष्यस्य तात्पर्यं संप्रकाश्यते ॥

भगवानाचार्यवर्यः ब्रह्मसूत्राणि भाष्यादिभिः सम्य ग्व्याख्यायाल्पाधिकारिणामनुदिनपठनार्थमधिकरणसंग्रहव्याजेन सर्वशास्त्रार्थसंग्रहरूपमणुभाष्यं कर्तुकामः क्रमेणाध्यायचतुष्टयप्रतिपाद्यविशे(ष)ण विशिष्टतया गुरुत्वेन च श्रीनारायणं प्रणमन् चिकीर्षितं प्रतिजानीते । —नारायणमिति । गुरून् व्यासान् । अपिपदेन स्वस्य गुरूदेवताभेदे रुचिं सूचयति । अनेनैव प्रेक्षावत्प्रवृत्त्यङ्गं विषयादिकं सूचितं । नारायण एव विषयः । तद् ज्ञानयोग्यः तादिच्छुरेवाधिकारी । ज्ञानगमने प्रयोजने यथायोग्यं सम्बन्धः ।

Colophon :

इति प्रथमाध्यायस्य लोकतोऽन्यत्र प्रसिद्धनामात्मकः पादः समाप्तः ।

End :

अध्यायचतुष्टयप्रतिपाद्यत्वेनान्तेपि मङ्गलमाचरितं
प्रत्यध्यायं प्रतिनयं प्रतिपादं च वर्णशः ।
वासुदेवादिरूपेण प्रोक्तो विष्णुः प्रसीदताम् ॥

Colophon :

इत्यणुभाष्यटीका समाप्ता ।

Scribe adds :

इन्द्रियाणि दशैकं च मनस्तन्मात्रकास्तथा
पञ्चैव षोडशकलं लिङ्गदेहमनादितः ।

R. No. **5816**

Paper. $6\frac{1}{4} \times 4\frac{1}{2}$ inches. Foll. 15. Lines, 9 on a page. Devanāgarī. Good. Extent, 180 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

द्वादशस्तोत्रम्—आनन्दतीर्थप्रणीतम्

DVĀDAŚASTOTRAM by Ānandatīrtha.

Same work as that described under D. No. 10068.

Complete.

R. No. **5817**

Paper. $8\frac{1}{4} \times 4\frac{1}{2}$ inches. Fol. 51. Lines, 9 on a page. Devanāgarī. Good. Extent, 816 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

भगवद्गीता by व्यासरचिता

BHAGAVADGĪTĀ by Vyāsa.

Same work as described under D. No. 1992.

Complete.

R. No. **5818**

Paper. 8×4 inches. Foll. 251. Lines, 10 on a page. Devanāgarī. Good. Extent, 4,016 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

भागवततात्पर्यनिर्णयः—आनन्दतीर्थप्रणीतः

BHĀGAVATATĀTPARYANIRṆAYAḤ by Ānandatīrtha.

Same work as that described under D. No. 4823.

Complete.

R. No. **5819**

Paper. 4½ × 3 inches. Foll. 42. Lines, 6 on a page. Devanāgarī. Good. Extent, 261 Granthas.

Purchased in 1936–37 from Śrī Veṅkataramaṇācār, Hanumantalālā Street, Triplicane, Madras.

कृष्णामृतमहार्णवः—आनन्दतीर्थप्रणीतः

KṚṢṆĀMṚTAMAHĀRṆAVAḤ by Ānandatīrtha.

Same work as that described under R. No. 1448.
Complete.

R. No. **5820**

Paper. 7¾ × 3¾ inches. Foll. 57. Lines, 8 on a page. Devanāgarī. Good. Extent, 400 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācar, Hanumantalālā Street, Triplicane, Madras.

भगवद्गीता—व्यासरचिता

BHAGAVADGĪTĀ by Vyāsa.

Same work as that described under D. No. 1992.
Wants some portion of 1-7 and 8 Adhyāyas : Otherwise complete.

R. No. **5821**

Paper. 8½ × 4½ inches. Foll. 11. Lines, 12 on a page. Devanāgarī. Not good. Extent, 100 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

भेदोज्जीवनम् by व्यासतीर्थः ।

BHEDOJJĪVANAM by Vyāsatīrtha.

Same work as that described under D. No. 17092.
Wants the end.

R. No. **5822**

Paper. 8½ × 4½ inches. Foll. 13. Lines, 12 on a page. Devanāgarī. Not good. Extent, 120 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

भेदोज्जीवनटिप्पणी

BHEDOJJĪVANAṬIPPAṆĪ.

Similar to the work described under R. No. 454.
Wants the end.

R. No. 5823

Paper. 10½ × 4¼ inches. Foll. 17. Lines, 9 on a page. Devanāgarī. Good. Extent, 180 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār 22, Raja Hanumantalālā Street, Triplicane, Madras.

तत्त्वविवेकटीकाव्याख्या—भावप्रकाशिका by व्यासयतिः

TATTVAVIVEKAṬĪKĀVYĀKHYĀ—BHĀVAPRAKĀŚIKĀ by Vyāsayati.

Same work as that described under R. No. 1323 (*e*).

Complete.

R. No. 5824

Paper. 8 × 4¼ inches. Foll. 26. Lines, 12 on a page. Nandināgarī. Injured. Extent, 566 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

तत्त्वविवेकव्याख्यानविवरणम् by श्रीनिवासः ।

TATTVAVIVEKAVYĀKHYĀNAVIVARAṆAM by Śrīnivāsa.

A commentary on Jayatīrtha's Tattvavivekavyākhyā, which work has been described under D. No. 4786.

Beginning :

आनन्दादिगुणोद्रिक्तस्वाश्रितानन्ददायकम् ।
आनन्दात्मकसन्देहं भजेहं बादरायणम् ॥
श्रीमदानन्दतीर्थार्यान् जयराजमुनीनपि ।
वेदेशाख्य मुनीन् वन्दे गुरूणामपि सद्गुरून् ॥
प्रणम्य यादवाचार्यगुरूणां पादपङ्कजे ।
टीकां तत्वविवेकस्य व्याकुर्वे तत्कृपाबलात् ॥

इहहि परमकारुणिको जयतीर्थ श्रीमच्चरणः तत्वविवेकव्याख्यां कर्तुकामः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनतया शिष्टाचारपरम्परावगतं रमापतिप्रणतिं आदिगुरूणां परमगुरूणां प्रणतिश्चविधाय शिष्याशिक्षायै ग्रन्थादौ तामुपनिबन्धन् श्रोतृबुध्यनुकूलनाय स्वचिकीर्षितं प्रतिजानीते । प्रणम्येति । ल्यपा नमस्कारस्य ग्रन्थकरणात्पूर्वत्वकथनात्तयो रङ्गाङ्गिभावः सूचितो ज्ञातव्यः ।

End :

अभिवादनं करोमि । स्तौमिचेत्यर्थः । कमला श्रीर्हरिप्रियेत्यभिधानात् कमला महालक्ष्मीरित्यशेषमतिमङ्गलम् ।

यादवाचार्यहृत्पद्मगत श्रीमध्ववल्लभः ।
प्रीयतामनया ग्रन्थकृत्या श्रीबादरायणः ॥
लौकिकालौकिकफल लक्षणामृतदोहिनीम् ।
गुर्वनुग्रहरूपां तां कामधेनुमुपास्महे ॥

Colophon :

इति श्रीमद्यदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचितं तत्त्वविवेकव्याख्यानविवरणं समाप्तम् ।

R. No. 5825

Paper. 6½ × 4½ inches. Foll. 27. Lines, 7 on a page. Devanāgarī. Injured. Extent, 162 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

द्वादशस्तोत्रम् by आनन्दतीर्थः

DVĀDAŚASTOTRAM by Ānandatīrtha.

Same work as that described under D. No. 10068.

Foll. 27th is left blank.

R. No. 5826

Paper. 8 × 5 inches. Foll. 130. Lines, 15 on a page. Devanāgarī. Slightly injured. Extent, 4,060 Granthas. Not printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār. 22, Raja Hanumantalālā Street, Triplicane, Madras.

भगवद्गीतार्थप्रकाशः

BHAGAVADGĪTĀRTHAPRAKĀŚAH.

This work ellucidates the idea contained in the Bhagavadgītā.

Complete.

Beginning :

क्षत्रियाणां विशेषतो नारायणाद्दिष्टतदनुबन्धिनिग्रहं परमधर्मं बन्धुस्नेहादिना अधर्मत्वेनाशङ्क्य ततो निवृत्तप्रायमात्मनः प्रियतम मर्जुनं निमित्तीकृत्य स्वविहितवृत्या भक्त्या भगवदाराधनमेव परमधर्मः तद्विरुद्धः सर्वोप्यधर्मः तदधीनत्वात्सर्वस्येतिभावेन सकलसज्जनान् बोधयति भगवन्नारायण इत्याह—भगवानुवाचेति । तत्रादावर्जुनेन दृष्ट्वेमं स्वजनंकृष्णेत्यादिना यः शोकः कृतः यच्च पापमेवाश्रयेदस्मानित्यादिना मोक्षशास्त्रविरुद्धं वचनमुक्तं तदुभयमयुक्त मित्याह— अशोच्यानिति ।

Colophon :

इति श्रीमद्भगवद्गीतार्थप्रकाशे द्वितीयोऽध्यायः ।

End :

एवं सर्वार्थान् सम्यगवजानतः । तवसमुपेतसेनाद्वये जयापजयविवेकः कथं भासयत इत्यत आह । यत्रेति । यत्र यस्मिन् पक्षे योगेश्वरः सर्वोपयाना मीश्वरः उत्तरोत्तराभिवर्धैश्वर्यंततः सर्वतो विजयः ततश्चश्रीः महासाम्राज्यलक्ष्मीरिति ।

Colophon :

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे परमार्थनिर्णययोगो नामाष्टादशोऽध्यायः ।

Scribe adds :

इदं पुस्तकं लक्ष्मणसुतकृष्णेन लिखितम् । शके । १८०६ तारणवत्सर फाल्गुनमासे १२ गुरुवारे तिण्डिवनग्रामे लिखितम् ।

R. No. 5827

Paper. 9 × 3½ inches. Fol. 29. Lines, 12 on a page. Devanāgarī. Injured. Extent, 672 Granthas. Printed.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

वादावलिः by जयतीर्थः ।

VĀDĀVALIḤ by Jayatīrtha.

Same work as that described under D. No. 4983.

Wherein see for the beginning.

Complete.

End :

परस्परसुखदुःखाद्यनुसन्धानप्रसङ्गपराहतं च विमतानि कलत्राणि देवदत्तस्यैव भोगायतनानि कलत्रत्वात् संप्रतिपन्नकलत्रवदित्याद्याभाससमान योगक्षेमतयापहास्यं ।

जयतीर्थमुनीन्द्रेण मुग्धबोधाय निर्मितम् ।
वाङ्मुखाद्वाङ्मुखं भूयात् प्रीतये हरिमध्वयोः ॥

Colophon :

इति श्रीमज्जयतीर्थभिक्षुविरचिता वादावलिः समाप्ता ।

R. No. **5828**

Paper. 9 × 4½ inches. Foll. 42. Lines, 8 on a page. Devanāgarī. Injured. Extent, 533 Granthas. Printed.

Purchased in 1936–37 from the Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

ईशावास्योपनिषद्भाष्यटीका by जयतीर्थः

ĪŚĀVĀSYOPANIṢADBHĀṢYAṬĪKĀ by Jayatīrtha.

Same work as that described under R. No. 493.

Complete.

R. No. **5829**

Paper. 12 × 5¼ inches. Foll. 128. Lines, 11 on a page. Devanāgarī. Injured. Extent, 3,520 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

शेषधर्मः

ŚEṢADHARMAḤ.

Same work as that described under D. No. 2087.

Contains 1 to 57 Adhyāyas.

R. No. **5830**

Paper. 12½ × 6 inches. Foll. 122. Lines, 10 on a page. Devanāgarī. Slightly injured. Extent, 3,418 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

भगवद्गीता—श्रीधरकृतसुबोधिनीव्याख्यासहिता

BHAGAVADGĪTĀ with VYĀKHYĀ SUBODHINĪ of Srīdhara.

Same work as that described under D. No. 2064.

R. No. 5831

Paper. 12½ × 5½ inches. Foll. 30. Lines, 15 on a page. Devanāgarī. Slightly injured. Extent, 2,100 Granthas. Not printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

अभिनवताण्डवः by सत्यनाथतीर्थः ।

ABHINAVATĀṆḌAVAḤ by Satyanāthatīrtha.

Same work as that described under R. No. 5807.

Anumānakhaṇḍa complete.

R. No. 5832

Paper. 11½ × 4¾ inches. Foll. 50. Lines, 12 on a page. Devanāgarī. Injured. Extent, 1,500 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

भगवद्गीताभाष्यम् by आनन्दतीर्थः ।

BHAGAVADGĪTĀBHĀṢYAM by Ānandatīrtha.

Same work as that described under D. No. 2080.

Complete.

R. No. 5833.

Paper. 12¼ × 4½ inches. Foll. 18. Lines, 8 on a page. Devanāgarī. Injured. Extent, 924 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

प्रपञ्चमिथ्यात्वानुमानखण्डनव्याख्या—पञ्चिका by जयतीर्थः ।

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAVYAKHYĀ PAÑCIKĀ by Jayatīrtha.

Same work as that described under D. No. 4800.

Complete.

R. No. 5834

Paper. 12¼ × 4¼ inches. Foll. 9. Lines, 8 on a page. Devanāgari. Injured. Extent, 162 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Rāja Hanumantalālā Street, Triplicane, Madras.

मायावादखण्डनव्याख्या by जयतीर्थः

MĀYĀVĀDAKHAṆḌANAVYĀKHYĀ by Jayatīrtha.

Same work as that described under D. No. 4836.

Complete.

R. No. 5835

Paper. 12¼ × 4¼ inches. Foll. 9. Lines, 9 on a page. Devanāgarī. Injured. Extent, 172 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

तत्त्वविवेकव्याख्या by जयतीर्थः ।

TATTVAVIVEKAVYĀKHYĀ by Jayatirtha.

Same work as that described under D. No. 4786.

Complete.

R. No. 5836

Paper. 12 × 4¼ inches. Foll. 31. Lines, 9 on a page. Devanāgarī. Injured. Extent, 686 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

प्रमाणलक्षणटीका—न्यायकल्पलता by जयतीर्थः

PRAMĀṆALAKṢAṆAṬIKĀ—NYĀYAKALPALATĀ by Jayatīrtha.

Same work as that described under D. No. 4808.

Wants the end; otherwise complete.

R. No. 5837

Paper. 12¼ × 4½ inches. Foll. 9. Lines, 9 on a page. Devanāgarī. Injured. Extent, 96 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

तत्त्वसंख्यानविवरणम् by जयतीर्थः ।

TATTVASAṄKHYĀNAVIVARAṆAM by Jayatīrtha.

Same work as that described under D. No. 4789.

R. No. 5838

Paper. $8\frac{1}{4} \times 4\frac{1}{2}$ inches. Foll. 7. Lines, 11-13 on a page. Devanāgarī. Injured. Extent, 85 Granthas. Not printed.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācār, 22, Raja Hanumantalālā Street, Triplicane, Madras.

मन्त्रपद्धतिः

MANTRAPADDHATIḤ.

Similar to the work described under R. No. 3617 (*e*).

Complete.

Beginning :

तत्त्वन्यासमातृकान्यासानन्तरं संध्यागायत्रीजपः कार्यः। अथाष्टाक्षरमन्त्रः। गुरुनमस्कारः ओं ओं नमो नारायणाय। ओमिति मन्त्रेण प्राणायामः। ३६, २४, १२,—अथाष्टाक्षरन्यासः। ओं ओं विश्वाय नमः। शिरसि। ओं नं तैजसाय नमः। नेत्रयोः। ओं मों प्राज्ञाय नमः। नासिकायां। ओं नां तुर्याय नमः। वदने। ओं रां आत्मने नमः हृदये। ओं यं अन्तरात्मने नमः। पादयोः। अथाष्टाङ्गुलिन्यासः।

. . . .

. . . .

इति नारायणाष्टाक्षरमन्त्रः। अथप्रणवमन्त्रः। गृहस्थैर्मूलमन्त्रानन्तरं जप्यः। गुरुनमस्कारः। एकादशस्थाने नारायणाय नमः। ओं ओं ओं इति मन्त्रेण प्राणायामः।

End :

अस्य हंसमहामन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। हंसरूपी नारायणो देवता। ध्याने विनियोगः।

ध्यायेद्रवीन्दुकरमिन्दुसहस्रलक्ष
कान्तिमया सहितमास्ति बिम्बे।
शङ्खारिदोर्द्वयमुदर्कं महेन्दुबिम्बं
संसिच्यमानममृतेन रमादिनाथम्॥
हंसरूपी नारायणप्रेरणया नारायण-
प्रीत्यर्थं हंसमन्त्रजपं करिष्ये। मन्त्रः।

हंसः सोहं स्वाहा—जपसंङ्ख्या पूर्ववत् । जपसमाप्तिप्रकारस्तु प्रातः फलपूर्ववत्युक्तः ।

R. No. 5839

Paper. 12 × 4½ inches. Foll. 11. Lines, 10 on a page. Devanāgarī. Injured. Extent, 120 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, 22, Hanumantalālā Street, Triplicane, Madras.

नरसिंहस्तुतिः—सव्याख्या by त्रिविक्रम and नारायणाचार्य

NARASIMHASTUTIH with vyākhyā by Trivikramācārya and Nārāyaṇa.

Same work as that described under D. No. 10077.

Complete.

Colophon :

इति श्रीमद्विद्वन्मुकुटविश्वनाथसूरिनारायणपण्डिताचार्यविरचिता श्रीमत् परमाध्विपरिचैरकनिमानमहाकविकोटिसंघट्टितपादपीठ श्रीमत्रिविक्रम पण्डिताचार्यविरचिता श्रीमन्नृसिंहस्तुतिव्याख्यानं संपूर्णम् ।

R. No. 5840

Paper. 9¼ × 4½ inches. Foll. 27. Lines, 10 on a page. Devanāgarī. Injured. Extent, 200 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkataramaṇācār, 22, Hanumantalālā Street, Triplicane, Madras.

स्वाप्नबृन्दावनम् by वादिराजः

SVĀPNABṚNDĀVANAM by Vādirāja.

Same work as that described under D. No. 15265.

Contains 4 to 9 Adhyāyas in Prathamaprāṇapariccheda of Alaukikavibhāga. Incomplete.

R. No. 5841

Paper. 10½ × 4½ inches. Foll. 8. Lines, 9 on a page. Devanāgarī. Injured. Extent, 64 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkataramaṇācār, Hanumantalālā Street, Triplicane, Madras.

प्रपञ्चमिथ्यात्वानुमानखण्डनव्याख्या ।

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAVYĀKHYĀ.

Similar to the work described under D. No. 4800.

Complete.

Beginning:

भगवता बादरायणेन जन्माद्यस्य यत इति ब्रह्ममीमांसाशास्त्रे जगदुदयादि निमित्तकारणत्वं परब्रह्मणोलक्षणो लक्षणमभिहितं । तत्राहुरद्वैतवादिनः । जगतोमिथ्यात्वेन जगदुदयादिनिमित्तकारणात्वस्यापि मिथ्यात्वात् लक्षणसूत्र-मयुक्तम् । जगन्मिथ्यात्वे प्रमाणाभाव इति वाच्यं । अनुमानरूपप्रमाणस्यैव विद्यमानत्वात् । तथाहि—विमतं मिथ्या - दृश्यत्वात् ।

End:

तस्मात् साध्यविकलः स्यादेव । किञ्चैतावन्तं कालं अहं शुक्तिकामेव रजतत्वेन प्रतिपन्नोस्मीत्युत्तरकाले परामर्शस्य जायमानत्वेन तत्रदृश्य-त्वाभावात् साधनविकलो दृष्टान्तः । किंच विमतं मिथ्या दृश्यत्वादि-त्यनुमाने प्रमाणविरुद्धत्वरूपोपाधे र्विद्यमानत्वेनोपाधिग्रस्तानुमानस्य साध्यसाध-नशक्त्यभावात् दृश्यत्वानुमानेन प्रपञ्चस्य मिथ्यात्वसाधनमयुक्तमेतत् ।

Colophon:

इति प्रपञ्चमिथ्यात्वानुमानखण्डनं समाप्तम् ।

R. No. 5842

Paper. 12 × 4½ inches. Foll. 13. Lines, 8 on a page. Devanāgarī. Injured. Extent, 150 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

उपाधिखण्डनटीका by जयतीर्थ

UPĀDHIKAṆḌANAṬĪKĀ by Jayatīrtha.

Same work as that described under D. No. 4782.

Complete.

R. No. 5843

Paper. 11¾ × 4 inches. Foll. 15. Lines, 8 on a page. Devanāgarī. Injured. Extent, 200 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

ब्रह्मसूत्रानुव्याख्यानम् by आनन्दतीर्थः

BRAHMASŪTRĀNUVYĀKHYĀNAM by Ānandatīrtha.

Same work as that described under R. No. 452.

Contains 1st Pāda only.

R. No. 5844

Paper. 6¾ × 4½ inches. Foll. 179. Lines, 9 on a page. Devanāgarī. Injured. Extent, 3,580 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

ब्रह्मसूत्रभाष्यम् by आनन्दतीर्थः

BRAHMASŪTRABHĀṢYAM by Ānandatīrtha.

Same work as that described under R. No. 477.

Wants the beginning and end, 1, 2, 20, 33 to 36, 119, 120, 159, 160, 165, 166, 183 and 191 leaves are left blank.

R. No. 5845

Paper. 9 × 4½ inches. Foll. 123. Lines, 11 on a page. Devanāgarī. Injured. Extent, 2,900 Granthas. Not printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

तत्वोद्योतविवरणव्याख्या by केशव.

TATTVODYOTAVIVARAṆAVYĀKHYĀ by Keśava.

A commentary on Jayatīrtha's Tattvodyotavivaraṇa, which work has been described under D. No. 4792 .

Complete.

Beginning :

यद्विद्याधीशगुरोः शुश्रूषान्या नरोचते तस्मात् ।
अस्त्वेषाभक्तियुता श्रीविद्याधीशपादयोः सेवा ॥
तत्वोद्योतस्य विवृतेर्विद्याधीशोक्त . . . तिः ।
विवृतिर्भावगूढायाः क्रियते मन्दबुद्धये ॥
स्पष्टार्थं यत्पदं वाक्यं तन्न व्याक्रियतेमया ।
ग्रन्थगौरवभीरुत्वान्नचोद्ग्रन्थं बहूच्यते ।

ग्रन्थादौ मङ्गलमाचरन्नेव शिष्यावधानार्थं चिकीर्षितं निर्दिशति। विश्वेति। नन्विन्द्राग्नीत्यत्र तत्र तत्र सावकाशाद्यन्ताजाद्यतशास्त्रयो रुभयोरपि प्रसङ्गेपि विप्रतिषेधे परमिति न्यायेन परत्वादजाद्यतशास्त्रस्यैव प्रवृत्येन्द्रशब्दस्यैव पूर्वनिपातवत् अजाद्यदन्तमित्यस्येशकृष्णावित्यत्राल्पाच् तरमित्यस्य च प्लक्षन्यग्रोधावित्यत्र सावकाशत्वेनोत्पत्तिस्थितीत्यत्र तदुभयप्रसङ्गे विप्रतिषेधेपरमिति न्यायेन परत्वात् अल्पाच् तरशास्त्रस्यैव प्रवृत्त्या स्थिति-शब्दस्यैव पूर्वनिपातः स्यादितिचेद् अत्र स्वामिनः।

End :

तयोराश्रय इति बहुव्रीह्यर्थस्य बाधितत्वात् वर्तिपदार्थप्रधानत्वेन समासप्राबल्याच्चेति समापितग्रन्थव्याख्यानटीकाकारः गुर्वन्तर्गतभगवत्प्रीति-माशास्ते श्रीमदिति। कमलेत्यनेन भगवत्प्रीतिः प्रार्थिता भवतीत्यशेष मतिमङ्गलम्।

यद्विद्याधीशगुरोःशुश्रूषान्या नरोचते तस्मात्।
अस्त्वेषाभक्तियुता श्रीविद्याधीशपादयोः सेवा॥

Colophon :

इति श्रीमत्सकलविद्वच्चक्रचूडामणिपदवाक्यप्रमाणविदामग्रेसराणां श्रीमद्विद्याधीशपूज्यपादानां निजशिष्येण केशवेन कृतं तत्वोद्योतविषमविवरणं समाप्तम्।

R. No. 5846

Paper. 8 × 4½ inches. Foll. 42. Lines, 10 on a page. Devanāgarī. Good. Extent, 500 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

उपाधिखण्डनटीकाव्याख्या by श्रीनिवासः

UPĀDHIKHAṆḌANAṬĪKĀVYĀKHYĀ by Śrīnivāsa.

Similar to the work described under R. No. 3928 (*l*).

Complete.

Beginning :

पूर्णबोधकरसेवितपादं सज्जनेष्टदमनन्तसद्गुणम् ।
वासवीहृदयनन्दनं हरिं बादरायणमहं भजेऽनिशम्
भाविब्रह्मतयाम्नातानन्दतीर्थानहं मुहुः ।
जयराजमुनींश्चापि वन्दे वेदेशयोगिनः ।
प्रणम्य यादवाचार्यगुरूणां पादपङ्कजे ।
उपाधिखण्डनव्याख्यां व्याकुर्वे तत्कृपाबलात् ।

सर्वज्ञकल्पाष्टीकाकारा जयतीर्थश्रीमच्चरणाः तत्त्वप्रकाशिकापर-पर्यायस्योपाधिखण्डनस्य व्याख्यां कर्तुकामाः स्वचिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं स्वेष्टदेवतानमस्कारमङ्गलं मनसिकृत्वा शिष्याशिक्षायै ग्रन्थादा वुपनिबध्नन्तः सन्तः स्वचिकीर्षितं प्रतिजानते । रमाया रमणमिति ।

End :

षु कान्तौ । सुरशिरोरत्नप्रभामोषिणी नखात्विट् यस्य तत् सुरशिरोरत्नप्रभामोषिनखत्विट् तस्मिन् सुरशिरोरत्नप्रभानखत्विषि । त्विट् त्विषी त्विषीति षकारान्तनपुंसकलिङ्गत्विषुशब्दस्येयं सप्तमीतिज्ञातव्यं । रति रासक्तिर्भक्तिरिति यावत् । सदास्त्वित्य शेषमतिमङ्गलम् ।

यादवाचार्यहृत्पद्मगतश्रीमध्वहृद्गतः ।
प्रीयतामनयाग्रन्थकृत्या व्यासो दयानिधिः ॥

Colophon :

इति श्रीयदुपत्याचार्यपूज्यपादाराधकेन श्रीनिवासेन विरचिततत्व प्रकाशिकापरपर्यायोपाधिखण्डनव्याख्याविवृतिः समाप्ता ।

Scribe adds :

शके १७७७ - राक्षसनामसंवत्सरे चैत्रकृष्णप्रतिपद्यां(दि)समाप्तं ।

R. No. 5847

Paper. 8½ × 6½ inches. Foll. 202. Lines, 16 on a page. Nandināgari. Injured. Extent, 5,050 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

ब्रह्मसूत्रानुव्याख्यानटीका—न्यायसुधा—by जयतीर्थ

BRAHMASŪTRĀNUVYĀKHYĀNAṬĪKĀ—NYĀYASUDHĀ by Jayatīrtha.

Same work as that described under R. No. 876.

Contains 1st and 2nd Padās of 2nd Adhyāya. Incomplete.

R. No. 5848

Paper. 8½ × 3 inches. Foll. 79. Lines, 6 on a page. Devanāgarī. Good. Extent, 800 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

भगवद्गीता—व्यासरचिता

BHAGAVADGĪTĀ by Vyāsa.

Same work as that described under D. No. 1992.
Complete.

R. No. 5849

Paper. 10½ × 3 inches. Foll. 74. Lines, 7 on a page. Devanāgarī. Injured. Extent, 800 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Hanumantalālā Street, Triplicane, Madras.

भगवद्गीताभाष्यम् by आनन्दतीर्थ

BHAGAVADGĪTĀBHĀṢYAM by Ānandatīrtha.

Same work as that described under D. No. 2080.
Complete.

R. No. 5850

Paper. 9 × 4½ inches. Foll. 25. Lines, 9 on a page. Devanāgarī. Injured. Extent, 280 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane Madras.

तन्त्रसारसंग्रहः by आनन्दतीर्थ

TANTRASĀRASAṄGRAHAḤ by Ānandatīrtha.

Complete.

Same work as that described under No. 573 (*l*).

R. No. 5851

Paper. 10 × 5 inches. Foll. 34. Lines, 14 on a page. Dēvanāgarī. Slightly injured. Extent, 1,200 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācārya, Triplicane, Madras.

रुक्मिणीशविजयः सव्याख्यः

RUKMIṆĪŚAVIJAYAḤ

With commentary by Vādirāja and Nārāyaṇa Bhaṭṭa

Contains Sargas 1 to 13 complete.

Same work as that described under D. No. 11718 where in see for end.

Beginning :

हत्वा पूतनिकां विभज्य शकटं जित्वार्जुनौ दानवौ
(अध्या) रुह्य विनाश्य कालियविषं निष्पीऽयरिष्टंवरम्।
भित्वा केशिन मुन्मदं विषतरुं चोद्धृत्य गोवर्धनं
यः कंसं सगजेन्द्रमल्ल मवधी त्तस्मै नमो विष्णवे ॥
योविद्याधिपति र्विद्यामगाद्विश्वगुरुर्गुरोः ।
संपूर्णैश्वर्यसंपन्न स्तं शौरिं समुपास्महे ॥ तत इति ॥

R. No. 5852

Paper. 9½ × 4½ inches. Foll. 131. Lines, 12 on a page. Devanāgarī. Injured. Extent, 3,300 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

विष्णुरहस्यम्

VIṢṆURAHASYAM.

Same work as that described under D. No. 2358.

Complete.

R. No. 5853

Paper. 8 × 4 inches. Foll. 59. Lines, 10 on a page. Devanāgarī. Injured. Extent, 1,750 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

ऋग्भाष्यम्—आनन्दतीर्थप्रणीतम्

ṚGBHĀṢYAM by Ānandatīrtha.

Same work as that described under D. No. 31.

Complete.

R. No. 5854

Paper. 9½ × 5½ inches. Foll. 76. Lines, 14 on a page. Devanāgarī. Injured. Extent, 1,500 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

भागवतम्

BHĀGAVATAM.

Same work as that described under D. No. 2161.

Contains 48 adhyāyās in Daśamaskandha.

R. No. 5855

Paper. 9½ × 3½ inches. Foll. 150. Lines, 9 on a page. Devanāgarī. Injured. Extent, 3,750 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

ब्रह्मसूत्रानुव्याख्यानटीका—न्यायसुधा by जयतीर्थ

BRAHMASŪTRĀNUVYĀKHYĀNAṬĪKĀ—NYĀYASUDHĀ by Jayatīrtha.

Same work as that described under D. No. 4820.

Contains jijñāsādhikaraṇa only incomplete.

R. No. 5856

Paper. 8 × 4 inches. Foll. 135. Lines, 9 on a page. Devanāgarī. Injured. Extent, 1,000 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

ब्रह्मसूत्रभाष्यम् by आनन्दतीर्थ

BRAHMASŪTRABHĀṢYAM by Ānandatīrtha.

Same work as that described under D. No. 4810.

Complete.

R. No. 5857

Paper. 12 × 5½ inches. Foll. 73. Lines, 19 on a page. Nandināgarī. Injured. Extent, 950 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

ऋग्भाष्यटीका—जयतीर्थप्रणीता

RGBHĀṢYAṬĪKĀ by Jayatīrtha.

Same work as that described under D. No. 16909.
Complete.

R. No. 5858

Paper. 6 × 4 inches. Foll. 8. Lines, 12 on a page. Devanāgarī. Good. Extent, 150 Granthas.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācārya, Triplicane, Madras.

तन्त्रसारसङ्ग्रहः by आनन्दतीर्थ

TANTRASĀRASAṄGRAHAḤ by Ānandatīrtha.

Same work as that described under R. No. 573 (*l*).
Incomplete.

R. No. 5859

Paper. 4½ × 2½ inches. Foll. 4. Lines, 7 on a page. Devanāgarī. Injured. Extent, 50 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

शिवस्तुतिः

ŚIVASTUTIḤ.

Same work as that described under R. No. 1431 (*f*).
Incomplete.

R. No. 5860

Paper. 7¼ × 4 inches. Foll. 13. Lines, 9 on a page. Devanāgarī. Good. Extent, 200 Granthas. Printed.

Purchased in 1936–37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

तत्त्वसङ्ख्यानविवरणम् by जयतीर्थ

TATTVASAṄKYĀNAVIVARAṆAM by Jayatīrtha.

Same work as that described under D. No. 4789.

Wants beginning. Otherwise complete.

R. No. 5861

Paper. 5½ × 3 inches. Foll. 38. Lines, 5 in a page. Devanāgarī. Good. Extent, 400 Granthas. Printed.

Purchased in 1936-37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

विष्णुसहस्रनामस्तोत्रम्

VIṢṆUSAHASRANĀMASTOTRAM.

Same work as that described under D. No. 9008.
Complete.

R. No. 5862

Paper. 4½ × 3 inches. Foll. 12. Lines, 6 on a page. Devanāgarī. Good. Extent, 95 Granthas. Printed.

Purchased in 1936-37 from Śrī Veṅkaṭaramaṇācār, Triplicane, Madras.

विष्णुस्तोत्रम् by नारायणपण्डित

VIṢṆUSTOTRAM. by Nārāyaṇapaṇḍita.

Same work as that described under D. No. 10357.
Contains 24 stanzas only.

R. No. 5863

Palm leaf. 7¾ × 2½ inches. Foll. 165. Lines, 11 on a page. Nandināgarī. Good.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācar, Triplicane, Madras.

(*a*) ईशावास्योपनिषद्

ĪŚĀVĀSYOPANIṢAD.

Foll. 3*a* and 3*b*. Extent, 25 Granthas. Printed.
Same work as that described under D. No. 300.
Complete.

(*b*) ईशावास्योपनिषद्भाष्यम् by आनन्दतीर्थः

ĪŚĀVĀSYOPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 3*b*—6*b*. Extent, 56 Granthas. Printed.
Same work as that described under D. No. 317.
Complete.

(c) प्रश्नोपनिषद्

PRAŚNOPANIṢAD.

Foll. 6*b*—11*a*. Extent, 120 Granthas. Printed.
Same work as that described under D. No. 610.
Complete.

(d) प्रश्नोपनिषद्भाष्यम् by आनन्दतिर्थः

PRAŚNOPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 11*a*—13*b*. Extent, 50 Granthas. Printed.
Same work as that described under D. No. 622.
Complete.

(e) तलवकारोपनिषद्

TALAVAKĀROPANIṢAD.

Foll. 13*b*—15*b*. Extent, 60 Granthas. Printed.
Same work as that described under R. No. 573 (*c*).
Complete.

(f) तलवकारोपनिषद्भाष्यम् by आनन्दतीर्थः

TALAVAKĀROPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 15*b*—18*a*. Extent, 66 Granthas. Printed.
Same work as that described under D. No. 393.
Complete.

(g) माण्डूक्योपनिषद्

MĀṆḌŪKYOPANIṢAD.

Foll. 18*a*—21*a*. Extent, 80 Granthas. Printed.
Same work as that described under D. No. 694.
Complete.

(h) माण्डूक्योपनिषद्भाष्यम् by आनन्दतीर्थः

MĀṆḌŪKYOPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 21*a*—29*a*. Extent, 140 Granthas.
Same work as that described under D. No. 708.
Complete.

(i) कठवल्ल्युपनिषद्

KAṬHAVALLYUPANIṢAD.

Foll. 29*a*—39*b*. Extent, 250 Granthas. Printed.
Same work as that described under D. No. 334.
Complete.

(*j*) काठकोपनिषद्भाष्यम् by आनन्दतीर्थः
KĀTHAKOPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 39*b*—49*a*. Extent, 240 Granthas. Printed.
Same work as that described under D. No. 348.
Complete.

(*k*) बृहदारण्यकोपनिषद्
BṚHADĀRAṆYAKOPANIṢAD.

Foll. 68—100. Extent, 730 Granthas. Printed.
Same work as that described under D. No. 633.
Wants the end. Otherwise complete.

(*l*) बृहदारण्यकोपनिषद्भाष्यम् by आनन्दतीर्थः
BṚHADĀRAṆYAKOPANIṢADBHĀṢYAM by Ānandatīrtha.

Foll. 101—165. Extent, 1,430 Granthas. Printed.
Same work as that described under D. No. 648.
Contains 5 Adhyāyas.

R. No. **5864**

Palm leaf. $10\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 69. Lines, 7 on a page. Nandināgarī. Injured. Extent, 1,207 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācār, Triplicane, Madras.

सङ्ग्रहरामायणटीका — रामगुणरत्नप्रकाशिका by श्रीपतिः
SAṄGRAHARĀMĀYAṆAṬĪKĀ—RĀMAGUṆARATNAPRAKĀŚIKĀ by Śrīpati.

The commentary on the text described under R. No. 448.
Contains 1 to 6 Sargās of Ayodhyākāṇḍa.

Beginning :

अयोध्याकथां वक्तुं तदुपोद्घातत्वे दशरथाभिवृद्धिं कथयति राम इति । राजा दशरथः ।

Colophon :

इति श्रीमत्सङ्ग्रहरामायणटीकायां रामगुणरत्नप्रकाशिकायां अयोध्याकाण्डे प्रथमः सर्गः ।

End :

अत्र श्लोके रामाननं हसितेषु वनवह्नित्वेन्दुत्वामृतपू . . त्वा सारोपाद्रूपकालङ्कारः । वसन्ततिलकं वृत्तम् ।

Colophon :

इति श्रीमत्संग्रहरामायणटीकायां रामगुणरत्नप्रकाशिकायां अयोध्या-काण्डे षष्ठः सर्गः ।

R. No. 5865

Palm leaf. 7⅛ × 1¼ inches. Foll. 45. Lines, 9 on a page. Nandināgarī. Injured. Extent, 810 Granthas. Text printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, Triplicane, Madras.

मणिमञ्जरी by नारायणः with व्याख्या by श्रीनिवासः

MAṆIMAÑJARĪ by Nārāyaṇa with commentary by Śrīnivāsa.

The text described under D. No. 11866.

Contains 5 to 8 Sargas.

Beginning :

ततः परमहंसा ये कृष्णाभीमानुशिक्षिताः ।
व्यासाश्रयादत्रिजाद्या वेदशास्त्राण्यवर्तयन् ॥

ततः श्रीकृष्णादीनां स्वर्गयानानन्तरं कृष्णभीमानुशिक्षिताः श्रीकृष्ण-भीमसेनाभ्यां अनुशिक्षिताः पूर्वं श्रीरामाञ्जनेयाभ्यां ।

End :

उपसर्गयोगेन वर्तमानार्थत्वं । उपसर्गेणधात्वर्थो बलादन्यत्र नीयते इति विद्यमानत्वात् । अत्रश्लेषालङ्कृतिः । "नानार्थसंश्रयः श्लेषोवर्ण्या वर्ण्योभयास्पदः । सर्वदोमाधवः पायात् सयोगंगामदीधरद् । इति लक्षणो-दाहरणात् वृत्तं शार्दूलविक्रीडितम् । मसजास्ततः सगुरवः शार्दूलवि-क्रीडितमिति लक्षणोदाहरणाच्च ।

Colophon :

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायण-पण्डिताचार्यकृतप्रमेयमणिमञ्जरी व्याख्यासुप्रभामञ्जर्यां करिकेहल्लिकुलोत्पन्न-श्रीनिवासाचार्यतनूजातश्रीनिवासविरचितायामष्टमः सर्गः ।

कर्केहल्लिकुलोत्पन्न श्रीनिवासार्यसूनुना ।
सन्मुदे श्रीनिवासेन सुप्रभामञ्जरी कृता ॥
प्रमेयमणिमञ्जरी विवृतिसुप्रभामञ्जरी ।
कृताञ्जनधरापते श्चरणकञ्जसेवादरात् ॥
मया सुजनतुष्टये सकलबाल धीश . . . यै
गुरोः परनिषेवणप्रभवशेमुषी संपदा ॥
आर्याकार्ययशोराशिवारिराशिसुधाकरम् ।
वन्देहं श्रीमदश्वत्थ नारायणगुरुं मुदे ॥
येनैकादशवारं व्याख्यातं मध्वशास्त्रमान्तं तम् ।
कर्केहल्लि कुलोत्थं सत्तातं श्रीनिवासगुरुमीडे ॥

R. No. 5866

Palm leaf. 16 × 1½ inches. Fol. 166. Lines, 8 on a page. Nandināgarī. Injured. Extent, 7,304 Granthas. Printed.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācar, Triplicane, Madras.

महाभारततात्पर्यनिर्णयः by आनन्दतीर्थः
MAHĀBHĀRATATĀTPARYANIRṆAYAḤ by Ānandatīrtha.

Same work as that described under D. No. 4824.

Contains 1 to 31 Adhyayas, 32nd incomplete.

R. No. 5867

Palm leaf. 18 × 1½ inches. Fol. 107. Lines, 9 on a page. Nandināgarī. Injured. Extent, 5,296 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācār, Triplicane, Madras.

संग्रहरामायणटीका—रामगुणरत्नप्रकाशिका by श्रीपतिः
SAṄGRAHARĀMĀYAṆAṬĪKĀ-RĀMAGUṆARATNAPRAKĀŚIKĀ by Śrīpati.

Same work as that described under R. No. 5864.

Contains Bālakāṇḍa and Āraṇyakāṇḍa.

Beginning :

यःकौसल्यालवालः श्रुतिविततपदः चारुसीतालतेतो
बाहुस्कन्धे विराज त्करचरणदलः सद्गुणानाक्षिपुष्पः ।
नित्यश्रेयः फलाढ्यो दशरथसुरराड . . . . द्विजेन्द्रैः
श्रेयः सोऽव्यादुदारो मरूद्वनपरो रामकल्पद्रुमोऽस्मान् ॥

इह खलुविविध वासना तरङ्गपरम्परापारावारनिमग्नान् तदुत्तारणोपायानभिज्ञान् जनान् श्रीरामकथानां . . . .

Colophon :

इति श्रीमद्व्यासतर्थि श्रीमच्चरणाशिष्य विविधसंसाराब्धितरण शमदमादिगुणमणिगणशालि श्रीलक्ष्मीकान्ततीर्थश्रीपादकरकरालसंजातेन श्रीपतियतिना विरचितायां श्रीमत्संग्रहरामायणटीकायां रामगुणरत्नप्रकाशिकायां बालकाण्डे अष्टमः सर्ग । बालकाण्डः समाप्तः ।

End :

मारीचो मारीतो भूत्वा कनकमृगतया लक्ष्मणाह्वानकारी शिक्षादक्षेण बालीयतथमजल वृत्केवलालोक इति संख्यानवहरेयति नियम इत्यर्थः ।

Colophon :

इति श्रीमत्संग्रहरामायणटीकायां रामगुणरत्नप्रकाशिकायां आरण्यकाण्डे षष्ठः सर्गः । श्रीआरण्यकाण्डः समाप्तः

R. No. 5868

Palm leaf. 18 × 1¾ inches. Foll. 246. Lines, 8 on a page. Nandināgarī. Injured. Extent, 9,840 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācār, Triplicane, Madras.

बृहदारण्यकभाष्यटीका by रघूत्तमयतिः ।

BṚHADĀRAṆYAKABHĀṢYAṬĪKĀ by Raghūttamayati.

This is a commentary by Raghūttamayati, on the Bṛhadāraṇyakabhāṣya of Ānandatīrtha.

Wants the end.

Beginning :

लक्ष्मीपतिं सुखमुखैरखिलै र्गुणौघैः पूर्णं व्यपेतनिखिलाघमचिन्त्यशक्तिम् ।
प्राणादिसर्वजगतो जनिपूर्वहेतुं मोक्षैकहेतुमनिशं प्रणमामि विष्णुम् ॥

निखिलाद्वैतसिद्धान्तप्राप्ताज्ञानविनाशकः ।
श्रीमदाचार्यसूर्योऽयं दद्यात्तत्वप्रकाशनम् ।

वाग्वज्रेणाच्छिनद्योसकृदतिविवदद्वादि सन्दोहभू
भृत्पक्षान् धीमंन्दरेण प्रमथनमकरोन्मध्वसिद्धान्तवार्धेः ॥

सम्प्राप्यार्थो सुधांशोर्निखिलसुमनसः पाययामासमुक्त्यै
तं मूर्ध्ना श्रीजयार्यं सपदिबहुदृशं संयमीन्द्रं नमामि ॥

येन वेदान्तभाष्याणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थाख्यं वेदान्तार्थप्रसिद्धये ॥

योध्यापयित्वा वेदांश्चमध्व सिद्धान्त मादिशत् ।
न्यासं प्रादाद्धरेः प्रीत्यै रघुवर्यगुरुं भजे ॥

यत्काण्वोपनिषद्भाष्यं पूर्णप्रज्ञाविनिर्मितम् ।
तत्कृपालवमाश्रित्य व्याख्यास्ये तद्यथामति ॥

इहामुत्र फलभोगविरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणो अनिष्ट-निवृत्तेः परमानन्दावाप्तेश्च साधनत्वेन प्रवृत्तां काण्वीमुपनिषदमन्यैरन्यथा व्याख्यातत्वेनाप्रवृत्तामिव मन्यमानो यथावद्व्याचिख्यासुर्भगवानान्दतीर्थमुनिर्वि-लीनप्रकृतितयान्तरायविधुरोप्यनवरतमीश्वरप्रवणकरणवृत्तिरपि नारायणप्रणा-मादिकं प्रारिप्सितस्यानंतरायपरिसमाप्तेः प्रचयस्य च हेतुतया अविगीतशिष्टा चारपरम्परादिनावगतमवश्यं करणीयं शिष्यान् ग्राहयितुं ग्रन्थादौ निबध्नाति ॥ प्राणादेरिति ।

End :

दधासीति । हे भार्ये त्वमिधासि स्तूयसे । मोक्ष मैत्रावरुणिः मित्रावरुणनामक भगवद्ध्यार्थज्ञानभूता हे दीक्षे आरब्धा . . . . . या रुदती ।

. . . .

R. No. 5869

Palm leaf. 15 × 1½ inches. Foll. 83. Lines, 7 on a page. Nandināgarī. Good. Extent, 2,324 Granthas.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācār, Triplicane, Madras.

गदाधरीयटीका — न्यायरत्नम् by रघुनाथः

GADĀDHARĪYAṬĪKĀ—NYĀYARATNAM by Raghunātha.

Same work as that described under D. No. 4084.

Contains Caturdaśalakṣaṇī and a portion of Siddhāntalakṣaṇa.

R. No 5870

Palm leaf. 18 × 1½ inches. Foll. 98. Lines, 5 on a page. Nandināgarī. Good.

Purchased in 1936-37 from Śrī P. Veṅkaṭaramaṇācār, Triplicane, Madras.

(*a*) अलङ्कारमञ्जरीटीका — मधुधारा by सुमतीन्द्रयतीन्द्रः ।

ALAṄKĀRAMAÑJARĪṬĪKĀ—MADHUDHĀRĀ by Sumatīndra-yatīndra.

Foll. 1*a*—71*b*. Extent, 1,775 Granthas.

Similar work as that described under R. No. 2152.

Incomplete. Breaks off Śleṣaprakaraṇa.

Beginning :

यत्कर्तृकं जगदिदं यदनुप्रविष्टं
यस्मिन् मुहुर्निविशते यदनन्यनाथम् ।
तं प्राणुवीमहि महीतनयाकटाक्ष-
पीयूषवीचिरचिताप्लव मादिदेवम् ॥

. . . .

. . . .

प्राचामुपा चामदलं क्रियास्त
वाचा मनीराणि मतामृतानि ।
सुधीन्द्रयोगी तदिदं कृतालं-
कृपागमं न स्पृहयन्ति के वा ॥

श्रीसुमतीन्द्रयतीन्द्रो व्यतनोदतनीयसीमसीमगुणाम्।
व्याख्यां मधुधाराख्यां विवृतालङ्कारमञ्जरीहृदयाम् ॥
आस्माकी सुकविमुदे स्यात्तदलङ्कारमञ्जरीविवृतिः।
मधुधाराख्या पङ्कजसौरभ लक्ष्मीरिवालिहर्षाय ॥

End :

सकलावदातः प्रशान्तमोह इत्यत्र वाक्यगतः श्लेषः। तदन्यत्र यद्रत.। एते त्रयोपि श्लेषाः वर्णानामावापोद्वापाभ्यां विकृताः इरताविकृताः। तत्र विकृतेषु केवलप्रकृतगोचरो यथा।—

विराजचिविह्नो विभवार्चितांघ्रिः
श्रीज्या कृतान्द्री दशाननान्तः।
अखण्डरूपोपमनारिदासो
देवो नदेवोस्तु सलक्ष्मणांकः॥
वराह गरुडौ चिह्न यस्य सः विभवैः।

(*b*) तर्कसंग्रहव्याख्या—दीपिका by अन्नंभट्टः।
TARKASAṄGRAHAVYĀKHYĀ—DĪPIKĀ by Annambhaṭṭa.

Foll. 72—82. Extent, 250 Granthas. Printed.
Same work as that described under D. No. 4154.
Contains Śabdakhaṇḍa only.

(*c*) अलङ्कारमञ्जरी
ALAṄKĀRAMAÑJARĪ.

Foll. 86—98. Extent, 300 Granthas.
Similar to the work described under R. No. 2152.

Beginning :

वन्देमह्यनिशं निजाङ्कविलसत्नीरेरुहाक्षीमणी
जाग्रद्गात्ररुचिं विहंग वरिणी(?)व्यूढांसरूढासिकिम्।
तं कश्चिन्महिमान मुज्वलपदांभोजद्वयीध्यायिनः
सर्वार्थानपरोक्षयत्यतितरां यस्य स्मृतिर्वाञ्छितान्॥

End :

अधिकृत्यास्मदाचार्यान् विजयीन्द्रयतीश्वरान्।
प्रवृत्तेयमनुग्राह्या मूर्ध्ना लङ्कारमञ्जरी॥

R. No. 5871

Palm leaf. 15 × 1½ inches. Foll. 72. Lines, 7 on a page. Nandināgarī. Injured. Extent, 2,016 Granthas.

Purchased in 1936–37 from Śrī P. Veṅkaṭaramaṇācar, Triplicane, Madras.

वेङ्कटगिरिमहात्म्यम्

VEṄKAṬAGIRIMĀHĀTMYAṀ.

Similar to the work described under D. No. 2522.

Contains 1 to 13 Adhyāyas.

Beginning :

शौनक उवाच—

कथितं रङ्गमाहात्म्यं त्वया हस्तिगिरीशितुः ।
जगन्नाथस्य वै विष्णो र्माहात्म्य मतुलं मुनेः ॥
इदानीं श्रोतु मिच्छामि माहात्म्यं वेङ्कटेशितुः ।

श्रीसूतः—

सालुप - - या ब्रह्मन् चरितं वेङ्कटेशितुः ।
याद्या श्रुतं मया पूर्वं व्यासेनमिततेजसा ॥
तदद्याहं तथावस्ते सावधानमनाः शृणु ।

Colophon :

इति श्रीभविष्योत्तरपुराणे वेङ्कटगिरिमाहात्म्ये चतुर्युगपर्वताविभागो नाम प्रथमोऽध्यायः ।

End :

सारूप्यं च ददौ तस्य सभार्यस्य जगत्पतेः ।
नृपोऽतिदुःखसन्तप्तः कथं मे जगदीश्वरः ॥
सारूप्यं मे ददातीति तेन शोकं जगामह ।
सारूप्यं च ददौ देवो राज्ञस्तस्य महात्मनः ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे वेङ्कटगिरिमहात्म्ये वों ट्रिमा नृपस्य सारूप्य-मुक्तिदानं नाम त्रयोदशोऽध्यायः ।

R. No. 5872

Palm leaf. 12 × 1¾ inches. Foll. 129. Lines, 8 on a page. Nandināgarī. Injured. Extent, 3,855 Granthas. Printed.

Purchased in 1936–37 from Śrī P. Veṅkataramaṇācār, Triplicane, Madras.

बृहदारण्यकोपनिषद्भाष्यम् by आनन्दतीर्थः

